# आदर्शप्रश्नपत्रम् (बहुविकल्पात्मकम्)

## प्रथमसत्रीया परीक्षा (2021-22)

## कक्षा – द्वादशी (XII)

## संस्कृतम् (ऐच्छिकम्) कोड सं. – 022)

**अवधिः – सार्धैकहोरा** **सम्पूर्णाङ्काः – 40**

| | | |
|---|---|---|
| 1. | अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य समुचितं प्रश्नवाचकं पदं प्रदत्तविकल्पेभ्यः चिनुत– (केवलं प्रश्नपञ्चकम्)<br>(i) ये अविद्याम् उपासते **अन्धन्तमः** प्रविशन्ति।<br>(क) कीदृशः (ख) कुत्र<br>(ग) कथम् (घ) कः<br>(ii) गुरुप्रदेयाधिकनिः स्पृहः **अर्थी** अभिनन्द्यः अभूत्।<br>(क) कः (ख) का<br>(ग) कीदृशः (घ) किम्<br>(iii) शिशोरपि **दृप्तां** वाचं न सहन्ते।<br>(क) काम् (ख) केषाम्<br>(ग) कीदृशीम् (घ) कम्<br>(iv) पुरुषः **कर्मणाम्** अनारम्भात् नैष्कर्म्यं न अश्नुते।<br>(क) कस्याम् (ख) कासाम्<br>(ग) काम् (घ) केषाम्<br>(v) विषयेषु अत्यासङ्गः **पुरुषं** नाशयति।<br>(क) किम् (ख) कम्<br>(ग) काम् (घ) कीदृशम्<br>(vi) कुमार! तथा प्रयतेथाः यथा न धिक्क्रियसे **गुरुभिः** ।<br>(क) कैः (ख) काभिः<br>(ग) केभ्यः (घ) केन<br>(vii) योगः **कर्मसु** कौशलम्।<br>(क) कासु (ख) कस्मिन्<br>(ग) केषु (घ) कुत्र | 1×5=5 |
| 2. | यथानिर्देशम् उचितम् उत्तरं प्रदत्तविकल्पेभ्यः चिनुत – (केवलं प्रश्नपञ्चकम्)<br>(i) '**उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतन्तुशिष्यः**' अत्र '**प्रपेदे**' इति क्रियापदस्यकर्तृपदं किम्? | 1×5=5 |

| | | |
|---|---|---|
| | (क) कौत्सः (ख) वरतन्तुशिष्यः<br>(ग) उपात्तविद्यः (घ) शिष्यः<br>(ii) **'न कर्मणाम् अनारम्भात् नैष्कर्म्यं पुरुषोऽश्नुते** 'अत्र **'पुरुषः'** इति कर्तृपदस्य क्रियापदं किम्?<br>(क) अनारम्भात् (ख) नैष्कर्म्यम्<br>(ग) अश्नुते (घ) कर्मणाम्<br>(iii) **'मनो मे सम्मोहस्थिरमपि हरत्येष बलवान्'** अस्मिन् वाक्ये **'मनः'** इति पदस्य विशेषणपदं किम् ?<br>(क) हरति (ख) बलवान्<br>(ग) एषः (घ) सम्मोहस्थिरम्<br>(iv) **'अपरिणामोपशमो दारुणो लक्ष्मीमदः'** वाक्येऽस्मिन् विशेष्यपदं किम्?<br>(क) दारुणः (ख) लक्ष्मीमदः<br>(ग) अपरिणामोपशमः (घ) मदः<br>(v) **"रघुकौत्ससंवादः"** इति पाठः कस्मात् ग्रन्थात् सङ्कलितः?<br>(क) उत्तररामचरितात् (ख) कादम्बरीतः<br>(ग) रघुवंशात् (घ) गीतायाः<br>(vi) **'कर्मणैव हि संसिद्धिमास्थिताः जनकादयः'** इति वाक्यं कस्मात् ग्रन्थात् गृहीतम्?<br>(क) कादम्बर्याः (ख) रघुवंशात्<br>(ग) ईशावास्योपनिषदः (घ) गीतायाः<br>(vii) **"उत्तररामचरितम्"** इति नाटकस्य रचयिता कः?<br>(क) भवभूतिः (ख) कालिदासः<br>(ग) बाणभट्टः (घ) व्यासः | |
| 3. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं समुचितम् अर्थं विकल्पेभ्यः चिनुत- (केवलं प्रश्नपञ्चकम्)**<br>(i) केवलं च **<u>निसर्गत</u>** एवातिगहनं तमो यौवनप्रभवम्।<br>(क) प्रकृत्या (ख) स्वाभाविकरूपेण<br>(ग) निर्माणेन (घ) रचितेन<br>(ii) तस्मिन्नपो **<u>मातरिश्वा</u>** दधाति।।<br>(क) माता (ख) अश्वः<br>(ग) जलम् (घ) वायुः | 1x5=5 |

| | | |
|---|---|---|
| | (iii) **<u>विशांपतिः</u>** विष्टरभाजमारात्।<br>(क) चन्द्रः (ख) प्रजा<br>(ग) राजा (घ) निशा<br>(iv) शिष्टानध्याय इति **<u>अस्खलितं</u>** खेलतां बटूनां कोलाहलः।<br>(क) अनियन्त्रितम् (ख) अस्थिरम्<br>(ग) निरन्तरम् (घ) खण्डितम्<br>(v) रघोरुदारामपि **<u>गाम्</u>** निशम्य।<br>(क) धेनुम् (ख) वाणीम्<br>(ग) गीतम् (घ) गतिम्<br>(vi) अन्यदेव **<u>आहुः</u>** विद्यया।<br>(क) शृण्वन्ति (ख) आह्वयन्ति<br>(ग) कथयन्तु (घ) कथयन्ति<br>(vii) **<u>उत्सङ्गे</u>** गृहीत्वा आत्मगतम्।<br>(क) सम्पर्के (ख) सत्सङ्गे<br>(ग) अङ्के (घ) उत्पन्ने | |
| 4. | **अधोलिखितप्रश्नानानाम् उत्तराणि प्रदत्तविकल्पेभ्यः चिनुत – (केवलं प्रश्नत्रयम्)**<br>(i) **"विद्ययाऽमृतमश्नुते"** इति पाठः कुतः सङ्कलितः?<br>(क) छान्दोग्योपनिषदः (ख) ईशावास्योपनिषदः<br>(ग) केनोपनिषदः (घ) कठोपनिषदः<br>(ii) एतासु का बाणभट्टस्य रचना अस्ति?<br>(क) उत्तररामचरितम् (ख) मेघदूतम्<br>(ग) हर्षचरितम् (घ) रघुवंशम्<br>(iii) **"बालकौतुकम्"** इति पाठः कस्मात् ग्रन्थात् सङ्गृहीतः?<br>(क) उत्तररामचरितात् (ख) महावीरचरितात्<br>(ग) रामायणात् (घ) कादम्बर्याः<br>(iv) **"श्रीमद्भगवद्गीताम्"** कः अरचयत्?<br>(क) कालिदासः (ख) वाल्मीकिः<br>(ग) श्रीकृष्णः (घ) व्यासः | 1×3=3 |
| 5. | **अधोलिखितप्रश्नानानाम् उत्तराणि प्रदत्तविकल्पेभ्यः चिनुत - (केवलं प्रश्नत्रयम्)**<br>(i) **"विक्रमाङ्कदेवचरितम्"** कस्य रचना अस्ति?<br>(क) बाणभट्टस्य (ख) पद्मगुप्तस्य<br>(ग) कल्हणस्य (घ) बिल्हणस्य | 1x3=3 |

| | | |
|---|---|---|
| | (ii) **"दशकुमारचरितम्"** इति ग्रन्थस्य रचयिता कः?<br>(क) दण्डी (ख) सुबन्धुः<br>(ग) बाणभट्टः (घ) भट्टनारायणः<br>(iii) **"शिवराजविजयम्"** इति ग्रन्थे कति निःश्वासाः सन्ति?<br>(क) चतुर्दश (ख) अष्टादश<br>(ग) द्वादश (घ) षोडश<br>(iv) **"गद्यपद्यमयं काव्यम्"** किं कथ्यते?<br>(क) खण्डकाव्यम् (ख) चम्पू<br>(ग) गीतिकाव्यम् (घ) नाटकम् | |
| 6. | **अधोलिखितप्रश्नानानाम् उत्तराणि प्रदत्तविकल्पेभ्यः चिनुत -(केवलं प्रश्नचतुष्टयम्)**<br>(i) रूपकाणां कति भेदाः सन्ति?<br>(क) अष्ट (ख) सप्त<br>(ग) नव (घ) दश<br>(ii) **"नाट्यशास्त्रम्"** कः रचितवान्?<br>(क) भासः (ख) कालिदासः<br>(ग) भरतमुनिः (घ) व्यासः<br>(iii) **"विशाखदत्तः"** कं नाटकम् अरचयत्?<br>(क) कर्णभारम् (ख) मुद्राराक्षसम्<br>(ग) मालविकाग्निमित्रम् (घ) दण्डी<br>(iv) **"वेणीसंहारम्"** इति कः रचितवान्?<br>(क) भट्टनारायणः (ख) भासः<br>(ग) भवभूतिः (घ) कालिदासः<br>(v) नाट्यस्य विषये **"अभिनयः"** कस्मात् वेदात् गृहीतः?<br>(क) सामवेदात् (ख) ऋग्वेदात्<br>(ग) यजुर्वेदात् (घ) अथर्ववेदात् | 1×4=4 |
| 7. | **अधोलिखितप्रश्नानानाम् उत्तराणि प्रदत्तविकल्पेभ्यः चिनुत - (केवलं प्रश्नपञ्चकम्)**<br>(i) 'सूर्याश्वैर्यदि मासजौसततगाः... 'अस्याः परिभाषायाः अवशिष्टांशं किम्?<br>(क) मालिनी भोगिलोकैः (ख) शार्दूलविक्रीडितम्<br>(ग) शिखरिणी (घ) पादौ यदीयावुपजातयस्ताः<br>(ii) '........ तभजाजगौगः' परिभाषायाः पूर्वार्द्ध किम् ?<br>(क) उक्ता वसन्ततिलका (ख) मन्दाक्रान्ताम्बुधि<br>(ग) स्यादिन्द्रवज्रा (घ) रसैः रुद्रैश्छिन्ना | 1×5=5 |

| | | |
|---|---|---|
| | (iii) ‘अनुष्टुप्’ छन्दसः उदाहरणं किम्?<br>(क) तमर्चयित्वा विधिवद् विधिज्ञः तपोधनं मानधनाग्रयायी<br>(ख) वत्सायाश्च रघूद्वहस्य च शिशावस्मिन्नभिव्यज्यते<br>(ग) उत्साहसम्पन्नमदीर्घसूत्रम् क्रियाविधिज्ञं व्यसनेष्वसक्तम्<br>(घ) कर्मण्येवाधिकारस्ते मा फलेषु कदाचन<br>(iv) ‘उपजाति’ छन्दसः उदाहरणं चिनुत।<br>(क) अस्त्युत्तरस्यां दिशि देवतात्मा<br>(ख) पश्चात् पुच्छं वहति विपुलं तच्च धूनोत्यजस्रम्<br>(ग) भवन्ति नम्रास्तरवः फलोद्गमैः<br>(घ) पापान्निवारयति योजयते हिताय<br>(v) ‘रसैरुद्रैश्छिन्ना .........................’ एतस्याः परिभाषायाः उत्तरार्द्धं पूरयत।<br>(क) उदीरितौ जरौ (ख) यमनसभलागः शिखरिणी<br>(ग) मालिनी भोगिलोकैः (घ) शार्दूलविक्रीडितम्<br>(vi) ‘पश्चात् पुच्छं वहति विपुलं तच्च धूनोत्यजस्रम्’ अस्यां पङ्क्तौ किं छन्दः?<br>(क) इन्द्रवज्रा (ख) शिखरिणी<br>(ग) वंशस्थम् (घ) मन्दाक्रान्ता | |
| 8. | **अधोलिखितप्रश्नानानाम् उत्तराणि प्रदत्तविकल्पेभ्यः चिनुत –(केवलं प्रश्नत्रयम्)**<br>(i) जगणस्य रूपं किम्?<br>(क) ऽऽ। (ख) ऽऽऽ<br>(ग) ।।। (घ) ।ऽ।<br>(ii) ‘हविषा’ इत्यत्र को गणः?<br>(क) रगण (ख) सगण<br>(ग) भगण (घ) तगण<br>(iii) यगणस्य किं स्वरूपम्?<br>(क) ।ऽऽ (ख) ।।।<br>(ग) ऽ।। (घ) ऽऽऽ<br>(iv) ‘पावका’ इत्यत्र कः गणः?<br>(क) मगण (ख) भगण<br>(ग) रगण (घ) मगण | 1×3=3 |

| | | |
|---|---|---|
| 9. | अधोलिखितप्रश्नानानाम् उत्तराणि प्रदत्तविकल्पेभ्यः चिनुत- (केवलं प्रश्नचतुष्टयम्)<br>(i) 'सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।' इदं कस्यालङ्कारस्य लक्षणम्?<br>(क) अनुप्रासस्य (ख) यमकस्य<br>(ग) श्लेषस्य (घ) उत्प्रेक्षा<br>(ii) 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः' अस्यां पङ्क्तौ कः अलङ्कारः?<br>(क) रूपकम् (ख) श्लेषः<br>(ग) अनुप्रासः (घ) यमकः<br>(iii) अनुप्रासस्य लक्षणं किम्?<br>(क) वर्णसाम्यमनुप्रासः<br>(ख) भवेत् सम्भावनोत्प्रेक्षा<br>(ग) साधर्म्यमुपमा भेदे<br>(घ) भवेदर्थान्तरन्यासोऽनुसक्तार्थान्तराभिधा<br>(iv) काव्ये यदा उपमेये उपमानस्य आरोपः भवति तदा कः अलङ्कारः कथ्यते?<br>(क) उत्प्रेक्षा (ख) उपमा<br>(ग) यमकः (घ) रूपकम्<br>(v) 'श्लिष्टैः पदैरनेकार्थाभिधाने...' इति कस्यालङ्कारस्य लक्षणम्?<br>(क) अर्थान्तरन्यासस्य (ख) श्लेषस्य<br>(ग) उपमायाः (घ) यमकस्य | 1×4=4 |
| 10. | अधोलिखितवाक्येषु प्रयुक्तम् अलङ्कारं प्रदत्तविकल्पेभ्यः चिनुत -(केवलं प्रश्नत्रयम्)<br>(i) आरण्यकोपात्तफलप्रसूतिः स्तम्बेन नीवार इवावशिष्टः।<br>(क) उत्प्रेक्षा (ख) उपमा<br>(ग) श्लेषः (घ) अतिशयोक्तिः<br>(ii) रमते न मरालस्य मानसं मानसं विना ।<br>(क) यमकः (ख) अनुप्रासः<br>(ग) रूपकम् (घ) उपमा<br>(iii) निपुणं निरुप्यमाणो वत्साया मे वध्वा मुखचन्द्रेणापि संवदत्येव।<br>(क) उपमा (ख) अर्थान्तरन्यासः<br>(ग) रूपकम् (घ) श्लेषः<br>(iv) प्रतारणकुशलैर्धूर्तैः प्रतार्यमाणा वित्तमदमत्तचित्ता।<br>(क) अर्थान्तरन्यासः (ख) यमकः<br>(ग) श्लेषः (घ) अनुप्रासः | 1×3=3 |

****************************